# Shri Rigvediya Pancharudram

# શ્રીઋગ્વેદીય પઞ્ચરુદ્રમ્

## Document Information

Text title : RRigvedIyapancharudram

File name : RRigvedIyapancharudram.itx

Category : veda, svara, shiva, panchaka

Location : doc_veda

Transliterated by : Kr. PK

Proofread by : Kr. PK

Latest update : December 1, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીઋગ્વેદીય પઞ્ચરુદ્રમ્

॥ ૐ શ્રી ગણેશાય નમઃ ॥

## ગણપતિ સ્તુતિઃ

હરિઃ ૐ

ગણાનાં ત્વા ગણપતિં હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।

જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શૃણ્વન્નૂતિભિઃ સીદ સાદનમ્ ॥ ૨.૨૩.૦૧

નિષુસીદ ગણપતે ગણેષુ ત્વામાહુર્વિપ્રતમં કવીનામ્ ।

ન ઋતે તવત્ક્રિયતે કિં ચનારે મહામર્કં મઘવઞ્ચિત્રમર્ચ ॥ ૧૦.૧૧૨.૦૯

આ તૂ ન ઇન્દ્ર ક્ષુમન્તં ચિત્રં ગ્રાભં સં ગૃભાય । મહાહસ્તી દક્ષિણેન ॥ ૦૮.૮૧.૦૧

ૐ શ્રી મહાગણપતયે નમઃ ॥

## પઞ્ચરુદ્રમ્

અથ પઞ્ચરુદ્રમ્ પ્રારમ્ભઃ ।

હરિઃ ૐ

કદ્રુદ્રાય પ્રચેતસે મીળ્હુષ્ટમાય તવ્યસે । વોચેમ શંતમં હૃદે ॥ ૧.૦૪૩.૦૧

યથા નો અદિતિઃ કરત્પશ્વે નૃભ્યો યથા ગવે । યથા તોકાય રુદ્રિયમ્ ॥ ૧.૦૪૩.૦૨

યથા નો મિત્રો વરુણો યથા રુદ્રશ્ચિકેતતિ । યથા વિશ્વે સજોષસઃ ॥ ૧.૦૪૩.૦૩

ગાથપતિં મેધપતિં રુદ્રં જલાષભેષજમ્ । તચ્છંયોઃ સુમ્નમીમહે ॥ ૧.૦૪૩.૦૪

યઃ શુક્ર ઇવ સૂર્યો હિરણ્યમિવ રોચતે । શ્રેષ્ઠો દેવાનાં વસુઃ ॥ ૧.૦૪૩.૦૫

શં નઃ કરત્યર્વતે સુગં મેષાય મેષ્યે । નૃભ્યો નારિભ્યો ગવે ॥ ૧.૦૪૩.૦૬

અસ્મે સોમ શ્રિયમધિ નિ ધેહિ શતસ્ય નૃણામ્ । મહિ શ્રવસ્તુવિનૃમ્ણમ્ ॥ ૧.૦૪૩.૦૭

મા નઃ સોમપરિબાધો મારાતયો જુહુરન્ત । આ ન ઇન્દો વાજે ભજ ॥ ૧.૦૪૩.૦૮

યાસ્તે પ્રજા અમૃતસ્ય પરસ્મિન્ધામન્નૃતસ્ય ।
મૂર્ધા નાભા સોમ વેન આભૂષન્તીઃ સોમ વેદઃ ॥ ૧.૦૪૩.૦૯

ઇમા રુદ્રાય તવસે કપર્દિને ક્ષયદ્વીરાય પ્ર ભરામહે મતીઃ ।
યથા શમસદ્દ્વિપદે ચતુષ્પદે વિશ્વં પુષ્ટં ગ્રામે અસ્મિન્નનાતુરમ્ ॥ ૧.૧૧૪.૦૧
મૃળા નો રુદ્રોત નો મયસ્કૃધિ ક્ષયદ્વીરાય નમસા વિધેમ તે ।
યચ્છં ચ યોશ્ચ મનુરાયેજે પિતા તદશ્યામ તવ રુદ્ર પ્રણીતિષુ ॥ ૧.૧૧૪.૦૨
અશ્યામ તે સુમતિં દેવયજ્યયા ક્ષયદ્વીરસ્ય તવ રુદ્ર મીઢ્વઃ ।
સુમ્નાયન્નિદ્વિશો અસ્માકમા ચરારિષ્ટવીરા જુહવામ તે હવિઃ ॥ ૧.૧૧૪.૦૩
ત્વેષં વયં રુદ્રં યજ્ઞસાધં વઙ્કું કવિમવસે નિ હ્વયામહે ।
આરે અસ્મદ્દૈવ્યં હેળો અસ્યતુ સુમતિમિદ્વયમસ્યા વૃણીમહે ॥ ૧.૧૧૪.૦૪
દિવો વરાહમરુષં કપર્દિનં ત્વેષં રૂપં નમસા નિ હ્વયામહે ।
હસ્તે બિભ્રદ્ભેષજા વાર્યાણિ શર્મ વર્મ ચ્છર્દિરસ્મભ્યં યંસત્ ॥ ૧.૧૧૪.૦૫
ઇદં પિત્રે મરુતામુચ્યતે વચઃ સ્વાદોઃ સ્વાદીયો રુદ્રાય વર્ધનમ્ ।
રાસ્વા ચ નો અમૃત મર્તભોજનં ત્મને તોકાય તનયાય મૃળ ॥ ૧.૧૧૪.૦૬
માનો મહાન્તમુત માનો અર્ભકં મા ન ઉક્ષન્તમુત મા ન ઉક્ષિતમ્ ।
માનો વધીઃ પિતરં મોત માતરં મા નઃ પ્રિયાસ્તન્વો રુદ્ર રીરિષઃ ॥ ૧.૧૧૪.૦૭
મા નસ્તોકે તનયે મા ન આયૌ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ ।
વીરાન્મા નો રુદ્ર ભામિતો વધીર્હવિષ્મન્તઃ સદમિત્ત્વા હવામહે ॥ ૧.૧૧૪.૦૮
ઉપતે સ્તોમાન્પશુપા ઇવાકરં રાસ્વા પિતર્મરુતાં સુમ્નમસ્મે ।
ભદ્રા હિતે સુમતિર્મૃળયત્તમાથા વયમવ ઇત્તે વૃણીમહે ॥ ૧.૧૧૪.૦૯
આરે તે ગોઘ્નમુત પૂરુષઘ્નં ક્ષયદ્વીર સુમ્નમસ્મે તે અસ્તુ ।
મૃળા ચ નો અધિ ચ બ્રૂહિ દેવાધા ચ નઃ શર્મ યચ્છ દ્વિબર્હાઃ ॥ ૧.૧૧૪.૧૦
અવોચામ નમો અસ્મા અવસ્યવઃ શત્રૃણોતુ નો હવં રુદ્રો મરુત્વાન્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૧૪.૧૧

આતે પિતર્મરુતાં સુમ્નમેતુ મા નઃ સૂર્યસ્ય સંદૃશો યુયોથાઃ ।
અભિ નો વીરો અર્વતિ ક્ષમેત પ્ર જાયેમહિ રુદ્ર પ્રજાભિઃ ॥ ૨.૦૩૩.૦૧
ત્વાદત્તેભી રુદ્ર શંતમેભિઃ શતં હિમા અશીય ભેષજેભિઃ ।

વ્ય(૧)સ્મદ્દ્વેષો વિતરં વ્યંહો વ્યમીવાશ્ચાતયસ્વા વિષૂચીઃ ॥ ૨.૦૩૩.૦૨
શ્રેષ્ઠો જાતસ્ય રુદ્ર શ્રિયાસિ તવસ્તમસ્તવસાં વજ્રબાહો ।
પર્ષિ ણઃ પારમંહસઃ સ્વસ્તિ વિશ્વા અભીતી રપસો યુયોધિ ॥ ૨.૦૩૩.૦૩
માત્વા રુદ્ર ચુક્રુધામા નમોભિર્મા દુષ્ટુતી વૃષભ મા સહૂતી ।
ઉન્નો વીરાઁ અર્પય ભેષજેભિર્ભિષક્તમં ત્વા ભિષજાં શૃણોમિ ॥ ૨.૦૩૩.૦૪
હવીમભિર્હવતે યો હવિર્ભિરવ સ્તોમેભી રુદ્રં દિષીય ।
ઋદૂદરઃ સુહવો મા નો અસ્યૈ બભ્રુઃ સુશિપ્રો રીરધન્મનાયૈ ॥ ૨.૦૩૩.૦૫
ઉન્મા મમન્દ વૃષભો મરુત્વાન્ત્વક્ષીયસા વયસા નાધમાનમ્ ।
ઘૃણીવ ચ્છાયામરપા અશીયા વિવાસેયં રુદ્રસ્ય સુમ્નમ્ ॥ ૨.૦૩૩.૦૬
ક્વ(૧) સ્ય તે રુદ્ર મૃળયાકુર્હસ્તો યો અસ્તિ ભેષજો જલાષઃ ।
અપભર્તા રપસો દૈવ્યસ્યાભી નુ મા વૃષભ ચક્ષમીથાઃ ॥ ૨.૦૩૩.૦૭
પ્ર બભ્રવે વૃષભાય શ્વિતીચે મહો મહીં સુષ્ટુતિમીરયામિ ।
નમસ્યા કલ્મલીકિનં નમોભિર્ગૃણીમસિ ત્વેષં રુદ્રસ્ય નામ ॥ ૨.૦૩૩.૦૮
સ્થિરેભિરઙ્ગૈઃ પુરુરૂપ ઉગ્રો બભ્રુઃ શુક્રેભિઃ પિપિશે હિરણ્યૈઃ ।
ઈશાનાદસ્ય ભુવનસ્ય ભૂરેર્ન વા ઉ યોષદ્રુદ્રાદસુર્યમ્ ॥ ૨.૦૩૩.૦૯
અર્હન્બિભર્ષિ સાયકાનિ ધન્વાર્હન્નિષ્કં યજતં વિશ્વરૂપમ્ ।
અર્હન્નિદં દયસે વિશ્વમભ્વં ન વા ઓજીયો રુદ્ર ત્વદસ્તિ ॥ ૨.૦૩૩.૧૦
સ્તુહિ શ્રુતં ગર્તસદં યુવાનં મૃગં ન ભીમમુપહત્નુમુગ્રમ્ ।
મૃળા જરિત્રે રુદ્ર સ્તવાનોઽન્યં તે અસ્મન્નિ વપન્તુ સેનાઃ ॥ ૨.૦૩૩.૧૧
કુમારશ્ચિત્પિતરં વન્દમાનં પ્રતિ નાનામ રુદ્રોપયન્તમ્ ।
ભૂરેર્દાતારં સત્પતિં ગૃણીષે સ્તુતસ્ત્વં ભેષજા રાસ્યસ્મે ॥ ૨.૦૩૩.૧૨
યાવો ભેષજા મરુતઃ શુચીનિ યા શંતમા વૃષણો યા મયોભુ ।
યાનિ મનુરવૃણીતા પિતા નસ્તા શં ચ યોશ્ચ રુદ્રસ્ય વશ્મિ ॥ ૨.૦૩૩.૧૩
પરિ ણો હેતી રુદ્રસ્ય વૃજ્યાઃ પરિ ત્વેષસ્ય દુર્મતિર્મહી ગાત્ ।
અવ સ્થિરા મઘવદ્ભ્યસ્તનુષ્વ મીઢ્વસ્તોકાય તનયાય મૃળ ॥ ૨.૦૩૩.૧૪
એવા બભ્રો વૃષભ ચેકિતાન યથા દેવ ન હૃણીષે ન હંસિ ।
હવનશ્રુન્નો રુદ્રેહ બોધિ બૃહદ્વદેમ વિદથે સુવીરાઃ ॥ ૨.૦૩૩.૧૫

સોમારુદ્રા ધારયેથામસુર્યં(૧) પ્ર વામિષ્ટયોઽરમશ્નુવન્તુ ।
દમેદમે સપ્ત રત્ના દધાના શં નો ભૂતં દ્વિપદે શં ચતુષ્પદે ॥ ૬.૦૭૪.૦૧
સોમારુદ્રા વિ વૃહતં વિષૂચીમમીવા યા નો ગયમાવિવેશ ।
આરે બાધેથાં નિરૃતિં પરાચૈરસ્મે ભદ્રા સૌશ્રવસાનિ સન્તુ ॥ ૬.૦૭૪.૦૨
સોમારુદ્રા યુવમેતાન્યસ્મે વિશ્વા તનૂષુ ભેષજાનિ ધત્તમ્ ।
અવ સ્યતં મુઞ્ચતં યન્નો અસ્તિ તનૂષુ બદ્ધં કૃતમેનો અસ્મત્ ॥ ૬.૦૭૪.૦૩
તિગ્માયુધૌ તિગ્મહેતી સુશેવૌ સોમારુદ્રાવિહ સુ મૃળતં નઃ ।
પ્રનો મુઞ્ચતં વરુણસ્ય પાશાદ્ગોપાયતં નઃ સુમનસ્યમાના ॥ ૬.૦૭૪.૦૪

ઇમા રુદ્રાય સ્થિરધન્વને ગિરઃ ક્ષિપ્રેષવે દેવાય સ્વધાવ્ને ।
અષાળ્હાય સહમાનાય વેધસે તિગ્માયુધાય ભરતા શૃણોતુ નઃ ॥ ૭.૦૪૬.૦૧
સ હિ ક્ષયેણ ક્ષમ્યસ્ય જન્મનઃ સામ્રાજ્યેન દિવ્યસ્ય ચેતતિ ।
અવન્નવન્તીરુપ નો દુરશ્ચરાનમીવો રુદ્ર જાસુ નો ભવ ॥ ૭.૦૪૬.૦૨
યાતે દિદ્યુદવસૃષ્ટા દિવસ્પરિ ક્ષ્મયા ચરતિ પરિ સા વૃણક્તુ નઃ ।
સહસ્રં તે સ્વપિવાત ભેષજા મા નસ્તોકેષુ તનયેષુ રીરિષઃ ॥ ૭.૦૪૬.૦૩
માનો વધી રુદ્ર મા પરા દા મા તે ભૂમ પ્રસિતૌ હીળિતસ્ય ।
આનો ભજ બર્હિષિ જીવશંસે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૬.૦૪

અસ્મે રુદ્રા મેહના પર્વતાસો વૃત્રહત્યે ભરહૂતૌ સજોષાઃ ।
યઃ શંસતે સ્તુવતે ધાયિ પજ્ર ઇન્દ્રજ્યેષ્ઠા અસ્માઁ અવન્તુ દેવાઃ ॥ ૮.૦૬૩.૧૨
ત્વમગ્ને રુદ્રો અસુરો મહો દિવસ્ત્વં શર્ધો મારુતં પૃક્ષ ઈશિષે ।
ત્વં વાતૈરરુણૈર્યાસિ શંગયસ્ત્વં પૂષા વિધતઃ પાસિ નુ ત્મના ॥ ૨.૦૦૧.૦૬
આવો રાજાનમધ્વરસ્ય રુદ્રં હોતારં સત્યયજં રોદસ્યોઃ ।
અગ્નિં પુરા તનયિત્નોરચિત્તાદ્ધિરણ્યરૂપમવસે કૃણુધ્વમ્ ॥ ૪.૦૦૩.૦૧
તવ શ્રિયે મરુતો મર્જયન્ત રુદ્ર યત્તે જનિમ ચારુ ચિત્રમ્ ।
પદં યદ્વિષ્ણોરુપમં નિધાયિ તેન પાસિ ગુહ્યં નામ ગોનામ્ ॥ ૫.૦૦૩.૦૩
ભુવનસ્ય પિતરં ગીર્ભિરાભી રુદ્રં દિવા વર્ધયા રુદ્રમક્તૌ ।
બૃહન્તમૃષ્વમજરં સુષુમ્નમૃધગ્ઘુવેમ કવિનેષિતાસઃ ॥ ૬.૦૪૯.૧૦
તમુ ષ્ટુહિ યઃ સ્વિષુઃ સુધન્વા યો વિશ્વસ્ય ક્ષયતિ ભેષજસ્ય ।

યક્ષ્વા મહે સૌમનસાય રુદ્રં નમોભિર્દેવમસુરં દુવસ્ય ॥ ૫.૦૪૨.૧૧
અયં મે હસ્તો ભગવાનયં મે ભગવત્તરઃ ।
અયં મે વિશ્વભેષજોઽયં શિવાભિમર્શનઃ ॥ ૧૦.૦૬૦.૧૨
ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય મામૃતાત્ ॥ ૭.૦૫૯.૧૨

## શાન્તિ પાઠમન્ત્રઃ

હરિઃ ૐ
ૐ
તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ ।
તન્નો રુદ્રઃ પ્રચોદયાત્ ॥

ઈશાનસ્સર્વવિદ્યાનામીશ્વરઃ સર્વભૂતાનાં ।
બ્રહ્માધિપતિર્બ્રહ્મણોઽધિપતિર્બ્રહ્મા શિવો મેઽસ્તુ સદાશિવોમ્ ॥

ૐ
શિવો નામાસિ સ્વધિતિસ્તે પિતા નમસ્તે અસ્તુ મા મા હિꣳસીઃ ।
નિવર્તયામ્યાયુષેઽન્નાદ્યાય પ્રજનનાય રાયસ્પોષાય સુપ્રજાસ્ત્વાય સુવીર્યાય ॥

ૐ
વિશ્વાનિ દેવ સવિતર્દુરિતાનિ પરાસુવ ।
યદ્ભદ્રં તન્ન આસુવ ॥

ૐ
દ્યૌઃ શાન્તિરન્તરિક્ષꣳ શાન્તિઃ પૃથિવી શાન્તિરાપઃ શાન્તિરોષધયઃ શાન્તિઃ ।
વનસ્પતયઃ શાન્તિર્વિશ્વેદેવાઃ શાન્તિર્બ્રહ્મ શાન્તિઃ સર્વꣳ શાન્તિઃ શાન્તિરેવ શાન્તિઃ સા મા શાન્તિરેધિ ॥

ૐ
સર્વેષાં વા એષ વેદાનાꣳ રસો યત્સામઃ ।
સર્વેષામેવૈનમેતદ્ વેદાનાꣳ રસેનાભિષિઞ્ચતિ ॥

ૐ
શમ્ભવે નમઃ । નમસ્તે અસ્તુ ભગવન્વિશ્વેશ્વરાય મહાદેવાય ત્ર્યમ્બકાય ત્રિપુરાન્તકાય ત્રિકાગ્નિકાલાય કાલાગ્નિરુદ્રાય નીલકણ્ઠાય મૃત્યુઞ્જયાય સર્વેશ્વરાય સદાશિવાય શ્રીમન્મહાદેવાય નમઃ ॥

ૐ
યદક્ષર પદભ્રષ્ટં માત્રાહીનં ચ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં દેવ પ્રસીદ પરમેશ્વર ॥

ૐ
શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અનેન શ્રી રુદ્રાભિષેકકર્મણા શ્રી ભવાનીશઙ્કર મહારુદ્રાઃ પ્રીયતાં ન મમ ।

ઇતિ શ્રીઋગ્વેદીય પઞ્ચરુદ્રં સમાપ્તા ।
॥ ૐ શ્રી સામ્બ સદાશિવાર્પણમસ્તુ ॥

Encoded and proofread by Kr. PK

*Shri Rigvediya Pancharudram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*